International Journal of Sanskrit Research 2024; 10(3): 189-191

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 189-191
© 2024 IJSR
www.anantaajournal.com
Received: 21-04-2024
Accepted: 25-05-2024

**ड.अविनाश-गायेनः**
सहकारी अध्यापकः, संस्कृतविभागः
घाटाल-रवीन्द्र-शतवार्षिकी-महाविद्यालयः,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**ड.अविनाश-गायेनः**
सहकारी अध्यापकः, संस्कृतविभागः
घाटाल-रवीन्द्र-शतवार्षिकी-महाविद्यालयः,
पश्चिम बंगाल, भारत

# हरिदाससिद्धान्तवागीशस्य रुक्मिणीहरणमहाकाव्यस्य समीक्षणम्

**ड.अविनाश-गायेनः**

### आमुखम्

कविः तु दार्शनिकः। कवेः कर्म काव्यम्। काव्यस्य परिभाषाः अनेकाः सन्ति, किन्तु सर्वमान्या मुख्या परिभाषास्ति – वाक्यं रसात्मकं काव्यम् इति । अर्थात् येन वाक्येन रसोत्पत्तिः भवति तत् काव्यम् इति कथ्यते। रसः छन्दो अलङ्कारैः युक्तं काव्यम् आनन्दमुत्पादयतीति कथ्यते जगन्नाथेन - रमणीयार्थप्रतिपादकशब्दं काव्यम् इति। कवितायाः परिभाषाऽनेकाः सन्ति , किन्तु सर्वमान्या मुख्या परिभाषास्ति वाक्यं रसात्मकं काव्यम् अर्थात् येन वाक्येन रसोत्पत्तिः भवति तत् वाक्यं कविता इति कथ्यते। रस-छन्दालंकारैः युक्ता कविता आनन्दोत्पत्तिं करोति। महात्मना तुलसीदासेन रामचरितमानसे वालकाण्डो उक्तं यत् –

कीरति भणिति भूति भलि सोई।
सुरसरि सम सब कर हित होई॥

अर्थात् येन काव्येन सर्वेषां जनानां हितं भवति तत् काव्यं साहित्यं कथ्यते। आनन्दो वै काव्यम् अर्थात् आनन्दः एव कवितायाः प्रथमं लक्षणमस्ति। आनन्दो वै यत् काव्यं तत् दृश्यश्रव्यभेदेन द्विधा विभक्तमस्ति। पुनः श्रव्यकाव्यस्य अवान्तरभेदेषु महाकाव्यमन्यतममस्ति। महाकाव्यसंसारे यानि महाकाव्यानि आधुनिकमहाकाव्यरूपेण प्रसिद्धानि सन्ति तेषु प्रसिद्धमहाकाव्येषु अन्यतमं हरिदाससिद्धान्तवागीशस्य रुक्मिणीहरणमहाकाव्यम्। रुक्मिणीहरणमहाकाव्यमाश्रित्य प्रबन्धोऽयं समर्पयामि।

### कविपरिचयः

आधुनिकसंस्कृतसाहित्यस्य गौरवोज्ज्वलसारस्वतेतिहासस्य वङ्गदेशस्य सुयोग्यः उत्तराधिकारी भारताचार्यः पद्मभूषणभूषितः महामहोपाध्यायः हरिदाससिद्धान्तवागीशः (भट्टाचार्यः) महाभागः। महाकाव्यस्य अन्तिमपद्ये कवेः परिचयः लभ्यते-

कोटालिपाडनगरोनशियानिवासी
मन्दात्मनापि कविलभ्यलशोऽभिलाषी।
भूभृल्लिलङ्घयिपुपङ्गुनुसमानधर्मा
श्रीमानिदं रचितवान् हरिदासशर्मा॥ 16.65 ॥

अयं पण्डितप्रकाण्डः पूर्ववङ्गेषु (वाङ्गलादेश) फरिदपुरजनपदस्य कोटालिपाडा इत्यन्तर्गते उनशिया-ग्रामे 1876 ईशवीयाब्दे अक्टोवरमासे द्वाविंशतिदिनाङ्के समजायत। अस्य पितुर्नाम आसीदु गङ्गाधरविद्यालङ्कारः, मातुश्च नाम विधुमुखीदेवी। अयं परमहंसपरिव्राजकाचार्यः वैदिकश्रेणीभुक्तब्राह्मण आसीत्। अयं श्रीमन्मधुसूदनसरस्वती महाभागस्य वंशधर आसीत्।

### कवेः विद्यालाभः

पञ्चदशतमे वयसि कलापव्याकरणोपाधिपरीक्षां विलिख्य तत्रापि प्रथमश्रेणीं प्राप्य शब्दाचार्यः इत्युपाधिना विभूषितोऽभूत्। अयं पितामहसकाशात् (काशीचन्द्रवाचस्पतेः) प्रथमतः शास्त्रपाठ गृहीतवान्। अनन्तरं महामहोपाध्याय-रामनाथसिद्धान्तपञ्चाननवर्यात् नव्यन्यायस्य पाठं लब्धवान्। तदनन्तरं पित्रादेशेन कलिकातामागम्य स जीवानन्दविद्यासागरस्यास्थाने काव्यशास्त्रमपठत्। काव्योपाधिं प्राप्य स फरिदपुरमण्डलान्तर्गतं कविराजपुरं गत्वा आनन्दचन्द्रविद्यारत्नस्य समीपे नव्यस्मृतिमधीतवान्। अवकाशकाले गृहं प्रत्यागम्य पितुः सकाशात् पुराणं ज्योतिषशास्त्रञ्च पठति स्म। न केवलं तावत् स स्वाध्यायेन साङ्ख्यं वेदान्तं मीमांसां, पातञ्जलदर्शनञ्च स्वयमेवाभ्यस्तवान्। एवं स विविधासु शास्त्रपरीक्षासु प्रथमं स्थानं लब्ध्वा सिद्धान्तवागीशः इत्युपाधिना विभूषितोऽभवत्।

अनन्तरं स्वदेशं प्रत्यावृत्य स्वग्रामस्थार्यविद्यालयेऽध्यापकपदे व्रती अभूत् । अस्मिन्नन्तरे स विविधवाद्ययन्त्राणां वादने विशिष्टां दक्षतां समर्जयत्।

**उपाधिः**

हरिदाससिद्धान्तवागीशः कलिकाताविश्वविद्यालयादीनां बहूनां शैक्षणिकप्रतिष्ठानानां प्राश्निकः, परीक्षकः, प्रच्छकः, प्रस्तावकश्चासीत्। वङ्गीयसाहित्यपरिषदः सहसभापतिपदम्, आर्यशिक्षासमित्या शब्दाचार्यः, ढाकास्थ-पूर्ववङ्गसारस्वतसमाजेन पुराणशास्त्री, सिद्धान्तवागीशः, भारतसर्वकारेण व्याकरणतीर्थः, काव्यतीर्थः, स्मृतितीर्थः, वाराणसीस्थभारतधर्ममहामण्डलेन महोपदेशकः, भारतीयपण्डितमहामण्डलेन महाकविः, शान्तिपुरपुराणपरिषदा भारताचार्यः, सर्वकारात् महामहोपाध्यायः, पद्मश्रीः, पद्मभूषणः, रवीन्द्रपुरस्कारः, अर्डर अफ मेरिट इत्यादिभिः प्रशस्तिभिः समलङ्कृतोऽभवत्। संस्कृते स्वीययोगदानार्थं स पूर्ववङ्गसारस्वतसमाजेन 'साङ्ख्यरत्नपुराणशास्त्री', 'विद्यावागीश' इत्येताभ्यामुपाधिभ्यां सभाजितः। ब्रिटिशसर्वकारेण (1933) 'महामहोपाध्यायोपाधिः' भारतसर्वकारेण (1960) 'पद्मभूषणोपाधि'श्च प्रदत्तौ।

**कवेः कृतयः**

सिद्धान्तवागीशेन प्रणीतग्रन्थानां सूची दीर्घा वर्तते। युगोपयोगी सरल ओजःस्वी च गद्यविन्यासस्तस्य भाषाप्रवाहं प्रवाहयति सुखपाठ्यतां च विदधाति ।

- स्मृतिशास्त्रम् - 1) स्मृतिचिन्तामणिः (ई.1961), 2) विधवाया अनुकल्पः।
- काव्यम्- 1) वियोगवैभवम् (खण्डकाव्यम्) (ई.1895), 2) रुक्मिणीहरणम् (महाकाव्यम्) (ई.1910) 3) विद्यावित्तविवादम् खण्डकाव्यम् (ई.1952) 4) सरला- गद्यकाव्यम् (ई.1954)
- नाटकम्-1) विराजसरोजिनी – नाटिका (ई. 1899), 2) वङ्गीयप्रतापम् (ई.1917) 3) मिवारप्रतापम् (ई. 1945) 4) शिवाजीचरितम् - महानाटकम् (ई.1946)
- अलङ्कारः- 1) काव्यकौमुदी (ई.1951) इतिहासः- 1) युधिष्ठिरस्य समयः (ई.1931) 2) गीतायाः प्रक्षिप्तवादस्य प्रतिवादः (ई.1960)
- सटीकानुवादकाव्यग्रन्थाः-1) उत्तररामचरितम् (ई.1913) 2) मालविकाग्निमित्रम् (ई.1913) 3) मालतीमाधवम् (ई.1914) 4) दशकुमारचरितम् (ई.1915) 5) कादम्बरी (1916) 6) साहित्यदर्पणः (ई.1918) 7) मेघदूतम् (ई.1919) 8) मृच्छकटिकम् (1920) 9) अभिज्ञानशकुन्तलम् (ई. 1921) 10) रघुवंशम् (ई.1924) 11) कुमारसम्भवम् (ई.1921) 12) शिशुपालवधम् (ई.1926) 13) नैषधचरितम्-पूर्वार्द्धम् (ई.1926) 14) नैषधचरितम् उत्तरार्द्धम् (ई.1927) 15) मुद्राराक्षसम् (ई.1929)।
- अमुद्रितग्रन्थसूची –
  काव्यम्- शङ्करसम्भवम् - खण्डकाव्यम् (ई.1894) ।
  नाटकम्- कंसवधम् (ई.1892), जानकीविक्रमम् (ई.1894) ।
  इतिहासः- वैदिकवादमीमांसा (ई.1894), समाजसंस्कारः (वङ्गभाषया) ई.1923।
  दर्शनम्- षर्शनसमुच्चयः (ई.1897) ।
- सटीकानुवादग्रन्थाः- 1) विक्रमोर्वशीयम्- नाटकम् (ई.1898) 2) महावीरचरितम्- नाटकम् (ई.1900)। सिद्धान्तवागीशस्य अविस्मरणीया कृतिः महाभारतम् (प्रामाणिकसंस्करणम्) चतसृभिः टीकाभिः समृद्धम्। 110 खण्डैः 20,000 मुद्रितपृष्ठाभिः सम्पादितम्। एकविंशत्या वर्षैः कठोरतपसा समुज्ज्वलं महाभारतसंस्करणम् अप्रतीममस्ति ।

**जीवनावसानम्**

हरिदाससिद्धान्तवागीशः 1961 कैस्ताब्दस्य डिसेम्बरमासे षड्विंशदिवसे स्वर्लोकं (26.12.1961) प्रयातः। वङ्गदेशस्येतिहासे स कश्चन असामान्यः सारस्वततपस्वीति प्रख्यातः। तस्यैव वाणीवरपुत्रस्य हरिदाससिद्धान्तवागीशस्य काव्यकौमुदीति अलङ्कारग्रन्थः समासेन समालोचयिष्यते।

**रुक्मिणीहरणमहाकाव्यसमीक्षणम्**

हरिदाससिद्धान्तवागीशः क्वचित् प्रकरणवक्रतामाश्रित्य क्वचित् प्राकृतिकवर्णनपुरस्सरं सविस्तरं वर्णयति रुक्मिणीहरणकथां षोडशसर्गैः। अत्र षोडशसर्गेषु 60 + 74+ 83+87+60+65+62+79+60+80+ 71+ 62+ 72+ 63+ 93+ 65 = 1136 श्लोकाः लसन्ति विविधवृत्ताश्रिताः, सालङ्काराश्च। रुक्मिणीसम्भवनामके प्रथमसर्गे कविः आशीर्वादात्मकमङ्गलं विद्धाति ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थम्। यथा-

शिवः शिवापदतलगः शवोऽपि सन्
भवन्महाम्बरमपि यो निरम्बरः ।
रमार्द्धभाक्तनुरपि मारमारकः
स वो भवो भवतु विभुर्विभूतिदः ॥ 1.1 ॥

मातुः शिवायाः दुर्गायाः करुणाकटाक्षं विना शिवः अपि शवः भवति। उक्तं खलु आचार्येण शङ्करेण-शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्। अर्थात् शक्त्या विना शिवस्य शिवत्वमेव न भवति। अपिच शवोऽपि मातुः करुणां प्राप्य शिवत्वं गच्छति। यस्य वस्त्रं व्याघ्रचर्मोत्तरीयकम्। कचित् शिवः भिक्षुकः सन्यासी भवति, यस्य किमपि वस्त्रं नास्ति। कालिदासः वदति- दिगम्बरत्वेन निवेदितं वसु। अतः महाम्बरं महाकाशम् इव विशालोऽपि यः निरम्बरः भवति भावः। अपि च सः शरीरार्धभागे रमणीयपत्नीशरीरं धारयति तेन तस्य कामवर्धनं भवेत्, परन्तु स महान् तपस्वी यः मारमारकः कामध्वंसकः भवति। एवंस्वरूपः सकलविभूतीनां दाता विभुः भवतामपि काव्यपाठकानां काव्यलेखकस्यापि मङ्गलम् आतनोतु इति भावः। काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये... इत्यादिमम्मटाचार्यस्य वचनात्। रुक्मिणिहरणमहाकाव्यस्य इदम् आद्यमङ्गलम्। आशीर्नमस्क्रियावस्तु... इत्यादौ अत्र वः विभूतिदो भवतु इति आशीर्वादात्मकं मङ्गलाचरणम्। अत्र अर्धनारीश्वरस्य तत्र पुनः शिवायाः माहात्म्यं वर्णयित्वा महाकविः हरिदासः प्रकारान्तरेण अस्मिन् काव्ये दाम्पत्यप्रेम्णि नायिकानायकयोः सहभागित्वं, नायिकायाः प्रामुख्यं च आक्षिपति।
तथैवात्र कविः अग्रे रुक्मिण्याः कलङ्कितं चरित्रं वर्णयितुकामः इति कलावतः तत् सृष्टिकर्तुः विधातुश्च प्रणामं रचयति। यथा-

कलावतः सकलजनप्रमोदिनः
सितात्मनोप्यमृतकरस्य यस्य च।
कलङ्किनीं किल परिचायिनीं तनो-
र्विधोर्विधां ननु विदधौ पटुर्विधिः ॥ 1.4॥

कविः भीष्मकं नवग्रहरूपं वर्णयन् अपि तं सुदुर्ग्रहं मनुते-

विकर्त्तनो महसि, मुखे शशी, कृतौ
स मङ्गलो, मनसि वुधो, गुरुर्गुणे।
कविर्गिरिः द्विषति शनिश्च तस्थिवान्
तथाप्यभून्नृपतिरसौ सुदुर्ग्रहः ॥17॥

अग्रे कविः भीष्मकस्य साधुचरितमित्थं सानुप्रासैः काव्यैः वर्णयति-

जजन्ति चेन्नहि जलजं जले जले
न चेत् क्षितौ फलति फलं वने वने।
नृपोचितो न खलु तदा तदात्मनि
मदो मनागपि धनसम्भवोऽभवत् ॥ 1.18॥

द्वापरयुगे भीष्मकस्य राज्यशासनकाले सर्वे प्रजाः आनन्दिताः आसन्। तस्य शासनम् उत्तमम् आसीत्। तत् प्रतिपादयितुं कविः तद्राज्यशासनगौरवं प्रतिपादयति अस्मिन् श्लोके। तदा सर्वत्र ज्ञानालोकः प्रसृतः आसीत्, अतः केवलं निशि अन्धकारः अभवत् अन्यत्र नाभवत्, वल्लरीसमूहे चञ्चलता परिव्याप्ता अतः अन्यत्र लोकाः चपलाः नाभवन, दिवसे औष्ण्यम् अनुभूतम्, अन्यत्र नाभवत्, जनानां विमलं यशः प्रसृतम्, अतः कलङ्कः नासीत्, केवलं चन्द्रमसि कलङ्कस्य कालुष्यम् अभवत्, सत्यत्रेतयाद्वापरादिषु कलिः नाम्ना युगः अभवत, अन्यत्र लोकेषु कलिः, कलहः व नाभवत्, वचनविन्यासे प्रथमादिविभक्तिप्रयोगः अभवत्, अन्यत्र विभक्तं विभागकरणं, भागरचनं नाभवत्, शरीरे शक्तिधारणम् चापि अतिष्ठत्, अन्यत्र नाभवत् इति भावः ॥ यथा-

तमःक्रमो निशि, चलता लताततौ
दिवोष्णता, शशिनि कलङ्ककालिमा।
कलिर्युगे, वचसि विभक्तियोजनम्
तदाभवद्वपुषि च शक्तिधारणम् ॥ 1.21 ॥

रुक्मिणीजन्मकथां निरूपयन् कविः निशा यथा प्रहरान् प्रसूय उषसं प्रसूते तथैव राज्ञी रुक्मादिपुत्रान् प्रसूय अन्तिमे रुक्मिणीं प्रसूतवती इति पूर्णोपमालंकारेण तोलयति-

निशासमा प्रहरसमान् प्रसूय सा
महीपतेरथ सुषमान् सुतान् प्रिया।
उषासमामधृत सुतां निजान्तरे
शुभाद्विधेर्विशदरुचीविरोचिनी ॥ 30॥

अनुप्रासेन दोहदान् वर्णयति-

वयस्यया कृतवरिवस्यया चिरं
महीभृता प्रणयभृता च सम्मृताः।
मदप्रदा वहुविधदोहदाः सदा
तदन्तिकं स्म परिचरन्ति नेप्सिताः ॥35॥

मातुः उदरं देवपुरीं च शून्यीकृत्य स्वयं लक्ष्मीः पृथिवीं पूर्णं कृत्वा जाता इति कविः सुन्दरं निरूपयति-

प्रसूदरं सुरविषयञ्च शून्यताम्
उपाम्बिकाकरमवनीञ्च पूर्णताम्।
नयन्त्यलं निजजनुषा स्वयं रमा
शुभे दिने समजनि कापि कन्यका॥ 38॥

द्वितीयसर्गे कविः रुक्मिण्याः वाल्यलीलां विद्याग्रहणं वर्णयति 74 श्लोकैः। तृतीये सर्गे रुक्मिराज्याभिषेकः 83 श्लोकैः निरूपितः। चतुर्थसर्गे 87, पञ्चमसर्गे 60 श्लोकाः सन्ति। षष्ठे रुक्मिणीविरहप्रसङ्गः वर्णितः 65 श्लोकैः। विरहवर्णानात्मकानि आद्यपद्यानि यथा-

श्रवणमुक्तिसुधा, दृशमाकृतिः
असुखि शून्यमनः प्रकृतिस्मृतिः।
हरति चाङ्गचयं परिरिप्सु ता
सखिवियोगविषं विषमो रिपुः ॥4॥
मलिनता तलिना नलिनानने
विकसिते हसिते विसवत् सिते।
सकललोकविलोभनलोकने
किमिति भाति यथोषसि सारसे ॥5॥

सप्तमे कविः मध्याह्नस्य सुन्दरं वर्णनं करोति 62 श्लोकैः। संलापनामके अष्टमे सर्गे 79 श्लोकैः दूतेन ब्राह्मणेन सह श्रीकृष्णस्य संलापः वर्णितः। कृष्णप्रयाण इति नवमसर्गे 60 श्लोकैः रुक्मिणीरक्षणाय कृष्णस्य यात्रा वर्णिता। 80 श्लोकात्मकस्य दशमसर्गस्य नामास्ति सखीसंलापः इति। एकादशसर्गे 71 श्लोकेषु सम्भोगशृङ्गारस्य वर्णना लभ्यते। 62 श्लोकात्मके द्वादशसर्गे शिशुपालागमनं वर्णितम्। त्रयोदशसर्गे 72 श्लोकेषु रुक्मिणीहरणं वर्णितम्। रुक्मिणीं नीत्वा प्रत्यागमनस्य कथा प्रयाणमिति चतुर्दशसर्गे 63 श्लोकैः वर्णिता। श्रीकृष्णस्य विजयगाथा 93 श्लोकैः विविधवन्यैः पञ्चदशसर्गे वर्णिता। अत्र कविः पद्म-गोमूत्रिका-लता-विशेषपद्मवन्ध-सर्वतोभद्र-वृक्ष-मुरजवन्धादिकं विनस्यति, क्वचित् यमक-अनुप्रासादिशद्वालङ्कारान् क्वचिच्चोपमा-उत्प्रेक्षा- अतिशयोक्तिविशेषोक्तिस्वभावोक्त्याद्यर्थालंकारान् प्रस्तौति। उदाहरणं यथा-

एकाक्षरपादः

लोललोलाललो लीलालालो लीलालिलीललः।
लीलेलालो लाललालः लीललोलोऽललाललः ॥ 15.75॥

मुरजबन्धः

सहसोच्चतमानश्रीः साहसोर्जितमानसः।
सहसोद्वर्द्धमानश्रीः साहसोच्चतमाननः ॥ 15.44 ॥

प्रतिलोमानुलोमपादः

सत्रा तेन नते त्रास कातरेप परे तका।
वाला नूततनूलावा चारुहाससहा रुचा ॥ 15.47 ॥

विवाहनामके पोडशसर्गे 65 श्लोकैः श्रीकृष्ण-रुक्मिण्योः विवाहेन महाकाव्यं परिसमाप्तम्।

**सहायकग्रन्थसूची**


1. 1.साहित्यदर्पणम् – कविराजविश्वनाथः, ड.सत्यव्रतसिंहः, चौखम्बा विद्याभवन, वाराणसी, 1970
2. 2.रसगङ्गाधरः – पण्डितराजजगन्नाथः, ड.श्रीनारायणमिश्रः, चौखम्बा कृष्णदास अकाडेमी, वाराणसी, 2002
3. 3.रामचरितमानसम् – तुलसीदासः, हनुमानप्रसाद पोद्दारः, गीता प्रेस, गोरखपर, 1998
4. 4.रुक्मिणीहरणम् – हरिदाससिद्धान्तवागीशः, हेमचन्द्रतर्कवागीशभट्टाचार्यः, सिद्धान्तविद्यालयम्, कलिकाता, 1964
5. 5.रुक्मिणीहरणम् – हरिदाससिद्धान्तवागीशः, सुनील-कुमार-जाना, संस्कृत वुक डिपो, कलिकाता, 2023.
6. 6.आधुनिकसंस्कृतसाहित्यम् – ड.नारायणदाशः, वि,एन्,पाब्लिकेशन्, कलिकाता, 2020.
7. आधुनिकसंस्कृतसाहित्येतिहासः – देवेश कुमार मिश्रः, इन्दिरा गान्धी राष्ट्रीय मुक्तविश्वविद्यालय, निउ दिल्ली, 2022